असस्+करोति	{ असᳵकरोति असः करोति
अनेषस्+पचति	{ अनेषᳵपचति अनेषः पचति

अकच्प्रत्यये–

एषकस्+करोति	{ एषकᳵकरोति एषकः करोति
एषकस्+रुद्रः	एषको रुद्रः
सकस्+हरति	सको हरति

आचि परे तु–

एषस्+अटति	एषोऽटति
एषस्+इच्छति	{ एष इच्छति एषयिच्छति
	{ एष एधते एषयेधते

सः+अवति — सोऽवति

सः+ईहते — { स ईहते / सयीहते

सः+आप्नोति — { स आप्नोति / साप्नोति

यत्र लोपं विना पादपूर्तिर्न भवेत्, तत्र अचिपरेऽपि 'सद्' शब्दस्य सुमत्ययसकारस्य लोपः ॥

सः+इमा — सेमामविड्ढिप्रभृतिम्

सः+एषः — सैष दाशरथी रामः।

लोपं विना पादपूर्ती—

सः+एवम् स एवमुक्त्वा मघवन्तमुन्मुग्धः ॥

झयः परस्य यरो द्वित्वं वा, न स्वचि परे ॥

वाक् — { वाक्क् / वाक्

वाक्+चौ — { वाच्चौ / वाच्चौ

वाक्+च — { वाक्च / वाक्च

अचि परे तु

वाक्+औ — वाचौ

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो वा द्वित्वम्।

गौरू+औ — { गौर्व्वौ / गौर्वौ

दु+अर्हति — { अर्हद्यति / अर्हति

अथोदाहरणदिक्—

लभ्+स्यति	लप्स्यति
दह्+स्यन्ति	धक्ष्यन्ति
नाम्+भ्या	नाम्भ्या
सस्+जः	सज्जः
लस्+जा	लज्जा
मस्+जति	मज्जति

ह्रस्वात्परस्य, अपदान्ताद्दीर्घात्, आङ्माङ्भ्यां परस्य छकारस्य 'च्छ' इत्ययमादेशो नित्यं, दीर्घात्पदान्तात्परस्य तु विकल्पेन ।

उदाहरणदिक्—

अ+छः	अच्छः
शिव+छाया	शिवच्छाया
ह्री+छः	ह्रीच्छः
म्ले+छः	म्लेच्छः
आ+छादयति	आच्छादयति
मा+छिदत्	माच्छिदत्
लक्ष्मी+छाया	लक्ष्मीच्छाया / लक्ष्मीछाया

इति रूपमालायां प्रदीपिके तृतीयभागे सन्धिभागः समाप्तः ॥


पुस्तक मिलनेका ठिकाना—

गङ्गाविष्णु श्रीकृष्णदास, "लक्ष्मीवेंकटेश्वर" प्रेस, कल्याण. | खेमराज श्रीकृष्णदास, "श्रीवेंकटेश्वर" प्रेस, बंबई.

॥ श्रीः ॥

रूपमालायाम् ॥

षड्लिङ्गभागः १ ।



शब्दरूपावल्यपरपर्यायः ।

महामहोपाध्यायपण्डितश्रीशिवदत्तशर्मविरचितः ।

गङ्गाविष्णु श्रीकृष्णदास,

मालिक-" लक्ष्मीवेङ्कटेश्वर " स्टीम्-प्रेस,

संवत् १९८९, शके १८९१.

कल्याण-बंबई.

शब्दाः	पृष्ठानि	शब्दाः	पृष्ठानि	शब्दाः	पृष्ठानि
ननान्दृ	... २९	पुनर्भू	... २७	[illegible]	... १०
नप्तृ	... १५	पुर्	...१००	पृथुमेदसी	... १०
नपात्	... ५०	पुरोडाश्	.... ७३	प्रेक्षोमहत्	... ८१
नामन्	....१०१	पुंस्	.... ७९	पुंसि	... ११
नासिका	.... २२	पूर्	... २	प्रेमन्	... ११
निर्जर	... ५	पूषन्	... ४७	[illegible]	.... ५१
निशा	.... २१	पृतना	. २१	[illegible]	.... ५०
नृ	.... ११	[illegible]	१५	[illegible]	.... ४१, ५०, १००
[illegible]	.... १	[illegible]	... ११		
[illegible]	.... १५	[illegible]	. १		
[illegible]	... ५२	[illegible]	.. १२	[illegible]	४९, ७०, ५०
[illegible]	५१	[illegible]	... १०		
[illegible]	१००	[illegible]	१	[illegible]	. ५१
[illegible]	.. ६०	[illegible]	९१	[illegible]	.... ११
[illegible]	:	[illegible]	१५	[illegible]	.. ५२
[illegible]	५०	[illegible]	... ११	[illegible]	. [illegible]
[illegible]	.. ५१	[illegible]	. ११	[illegible]	.... १५
[illegible]	.... [illegible]	[illegible]	... ४१	[illegible]	११
[illegible]	[illegible]	[illegible]	१	[illegible]	५१
[illegible]	५२	[illegible]	[illegible]	[illegible]	.. [illegible]
[illegible]	५२	[illegible]	६१	[illegible]	.. ५५
[illegible]	७०	[illegible]	८१	[illegible]	.. ५०
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	.... [illegible]
[illegible]	५१	[illegible]	५१	[illegible]	.... [illegible]

श्रीगणेशाय नमः ।

रूपमाला प्रारभ्यते ।



षड्लिङ्गविभागः ।

सुबन्त-तिङन्तभेदेन द्विविधेषु रूपेषु लाघवात्प्रथमं सुबन्तरूपाणि लिख्यन्ते ।

विभक्तिवचनज्ञापकयन्त्रमिदम् ।

वि०	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु	औ	जस्
द्वितीया	अम्	औट्	शस्
तृतीया	टा	भ्याम्	भिस्
चतुर्थी	ङे	भ्याम्	भ्यस्
पञ्चमी	ङसि	भ्याम्	भ्यस्
षष्ठी	ङस्	ओस्	आम्
सप्तमी	ङि	ओस्	सुप्

अकारान्तः पुंलिङ्गो रामशब्दः ।


	एक०	द्वि०	बहु०
प्र०	रामः	रामौ	रामाः
द्वि०	रामम्	रामौ	रामान्
तृ०	रामेण	रामाभ्याम्	रामैः
च०	रामाय	रामाभ्याम्	रामेभ्यः

(८) षड्लिङ्गशब्दानामकारादिक्रमानुक्रमणिका ।

इति शब्दानुक्रमणिका ।

श्रीगणेशाय नमः।

रूपमाला प्रारभ्यते।



षड्लिङ्गविभागः।

सुवन्त-तिङन्तभेदेन द्विविधेषु रूपेषु लाघवात्प्रथमं सुवन्तरूपाणि लिख्यन्ते।

विभक्तिवचनज्ञापकयन्त्रमिदम्।

वि०	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु	औ	जस्
द्वितीया	अम्	औट्	शस्
तृतीया	टा	भ्याम्	भिस्
चतुर्थी	ङे	भ्याम्	भ्यस्
पञ्चमी	ङसि	भ्याम्	भ्यस्
षष्ठी	ङस्	ओस्	आम्
सप्तमी	ङि	ओस्	सुप्

अकारान्तः पुंलिङ्गो रामशब्दः।

	एक०	द्वि०	बहु०
प्र०	रामः	रामौ	रामाः
द्वि०	रामम्	रामौ	रामान्
तृ०	रामेण	रामाभ्याम्	रामैः
च०	रामाय	रामाभ्याम्	रामेभ्यः

तम-अन्य-अन्यतर-इतर-त्व-सम-सिम-एक' इत्येतेषां रूपाणि बोध्यानि ॥

अकारान्तः पुंलिङ्गः पूर्वशब्दः ।

	एक०	द्वि०	बहु०
प्र०	पूर्वः	पूर्वौ	पूर्वे-र्वाः
द्वि०	पूर्वम्	पूर्वौ	पूर्वान्
तृ०	पूर्वेण	पूर्वाभ्याम्	पूर्वैः
च०	पूर्वस्मै	,,	पूर्वेभ्यः
पं०	पूर्वस्मात् द्,पूर्वात्, द्-	,,	,,
ष०	पूर्वस्य	पूर्वयोः	पूर्वेषाम्
स०	पूर्वस्मिन्, पूर्वे	,,	पूर्वेषु
सं०	हे पूर्व	हे पूर्वौ	हे पूर्वे-पूर्वाः

एवमेव ' पर-अवर-दक्षिण-उत्तर-अपर-अधर-स्व-अन्तर' इत्येतेषां रूपाणि ...नि ॥

...म-चरम-द्वय-द्वितय-त्रय-त्रितय-चतुष्टयादितयप्रत्ययान्त-अल्प-अर्ध-क-...दान्तानां तु जसि पूर्वशब्दवत्, अन्यत्र रामशब्दवद्रूपाणि॥ नेमशब्दस्य ...सि पूर्वशब्दवत्, अन्यत्र सर्वशब्दवद्रूपाणि ॥

अकारान्तः पुंलिङ्गो द्वितीयशब्दः ।

	एक०	द्वि०	बहु०
	द्वितीयः	द्वितीयौ	द्वितीयाः
०	द्वितीयम्	,,	द्वितीयान्
	द्वितीयेन	द्वितीयाभ्याम्	द्वितीयैः
	द्वितीयस्मै, याय	,,	द्वितीयेभ्यः—

१ सकल- शब्दसमानार्थक एव समशब्दोऽत्र गृह्यते; न तुल्यशब्दसमानार्थकः ॥ ...शब्दः संख्यावाची द्विवचनान्तः ।

पं०	[illegible]	[illegible]	[illegible]
ष०	[illegible]	[illegible]:	[illegible]
स०	[illegible], [illegible]	,,	[illegible]
संबो०	हे [illegible]	हे [illegible]	हे [illegible]

[illegible] ॥

अकारान्तः पुंलिङ्गो निर्जरशब्दः ।

	एक०	द्वि०	बहु०
प्र०	निर्जरः	निर्जरसौ, रौ	निर्जरसः, राः
द्वि०	निर्जरसम्,रम्	निर्जरसौ, रौ	निर्जरसः, रान्
तृ०	निर्जरसा, रेण	निर्जराभ्याम्	निर्जरैः
च०	निर्जरसे, राय	,,	निर्जरेभ्यः
पं०	निर्जरसः,रात्-द्	,,	,,
ष०	,,रस्य	निर्जरसोः,-रयोः	निर्जरसाम्, राणाम्
स०	निर्जरसि, रे	,, ,,	निर्जरेषु
संबो०	हे निर्जर	हे निर्जरसौ, रौ	हे निर्जरसः, राः

अकारान्तः पुंलिङ्गः पादशब्दः ।

	एक०	द्वि०	बहु०
प्र०	पादः, पद्-त्	पादौ, पदौ	पादाः, पदः
द्वि०	पादम्, पदम्	,, ,,	पादान्, पदः
तृ०	पादेन, पदा	पादाभ्याम्, पद्भ्याम्	पादैः, पद्भिः
च०	पादाय, पदे	,, ,,	पादेभ्यः, पद्भ्यः
पं०	पादात्-द्, पदः	,, ,,	,, ,,
ष०	पादस्य, पदः	पादयोः, पदोः	पादानाम्, पदाम्
[illegible]	पादे, पदि	,, ,,	पादेषु, पत्सु
[illegible]	हे पाद, हे पत्-द्, हे पादौ, हे पदौ,		[illegible]

अजन्तपुंलिङ्गाः ।

अकारान्तः पुंलिङ्गो दन्तशब्दः ।

एक०	द्वि०	बहु०
दन्, न्तः	दन्तौ, न्तौ	
दन्तम्, न्तम्	,, ,,	दन्तः, न्ताः
दता, न्तेन		दतः, न्तान्
दते, न्ताय	दद्भ्याम्, न्ताभ्याम्	दद्भिः, न्तैः
दतः, न्तात्-द्	,, ,,	दद्भ्यः, न्तेभ्यः
,, न्तस्य	,, ,,	,, ,,
दति, न्ते	दतोः—न्तयोः	दताम्, न्तानाम्
हे दन्, न्त,	,, ,,	दत्सु, न्तेषु
	हे दन्तौ, न्तौ	हे दन्तः, न्ताः

अकारान्तः पुंलिङ्गो मासशब्दः ।

एक०	द्वि०	बहु०
माः, सः	मासौ	
मासम्		मासः, साः
मासा, सेन	,,	,, सान्
मासे, साय	माभ्याम्, मासाभ्याम्	माभिः, सैः
मासः सात्-द्	,, ,,	माभ्यः, सेभ्यः
,, सस्य	,, ,,	,, ,,
मासि, से	मासोः, सयोः	मासाम्, सानाम्
हे माः, मास	,, ,,	मास्सु, सु, सेषु
	हे मासौ	हे मासः, साः

अकारान्तः पुंलिङ्गो यूषशब्दः ।

एक०	द्वि०	बहु०
षः	यूषणौ, षौ	
म्, षम्	,, ,,	यूषणः, षाः
		यूष्णः, षान्

तृ०	यूष्णा, षेण	यूषभ्याम् यूषाभ्यां	यूषभिः, षैः
च०	यूष्णे, षाय	” ”	यूषभ्यः, षेः
पं०	यूष्णः, षात्-द्	” ”	” ”
ष०	” षस्य	यूष्णोः ,षयोः	यूष्णा
स०	यूष्णि, यूषणि, षे	” ”	यूषसु
सं०	हे यूषन्, ष	हे यूषाणौ, षौ	हे यूष

संख्या-वि-सायपूर्वकस्याह्नान्तस्य द्व्यह्न-व्यह्न-सायाह्न-शब्दस्य तु. कवचने 'द्व्यह्नि-द्व्यहनि-द्व्यह्ने' इतिवत्त्रीणि रूपाणि,अन्यानि रामव

इत्यदन्ताः ॥

आकारान्तः पुंलिङ्गो विश्वपाशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	विश्वपाः	विश्वपौ	विश्वपाः
द्वि०	विश्वपाम्	विश्वपौ	विश्वपः
तृ०	विश्वपा	विश्वपाभ्याम्	विश्वपाभिः
च०	विश्वपे	”	विश्वपाभ्यः
पं०	विश्वपः	”	”
ष०	”	विश्वपोः	विश्वपाम्
स०	विश्वपि	”	विश्वपासु
संबो०	हे विश्वपाः	हे विश्वपौ	हे विश्वपाः

एवमेव सोमपा-शंखध्मादय आकारान्तधात्वन्ताः ॥

धात्वन्तभिन्नस्य तु हाहादिशब्दस्यान्यान्येव रूपाणि ॥

एकव०	द्वि०	बहु०
हाहाः	हाहौ	हाहाः
हाहाम्	”	हाहान्-

तृ०	हाहा	हाहाभ्याम्	हाहाभिः
च०	हाहे	,,	हाहाभ्यः
पं०	हाहाः	,,	,,
ष०	,,	हाहौः	हाहाम्
स०	हाहे	,,	हाहासु
संबो०	हे हाहाः	हे हाहौ	हे हाहाः

इत्याकारान्ताः ॥

इकारान्तः पुंलिङ्गो हरिशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	हरिः	हरी	हरयः
द्वि०	हरिम्	,,	हरीन्
तृ०	हरिणा	हरिभ्याम्	हरिभिः
च०	हरये	,,	हरिभ्यः
पं०	हरेः	,,	,,
ष०	हरेः	हर्योः	हरीणाम्
स०	हरौ	,,	हरिषु
संबो०	हे हरे	हे हरी	हे हरयः

एवमेव 'रवि-कवि-भूपति-गणपति-अग्नि-अतिथि-निधि-सुमति' प्रभृतयः ॥

इकारान्तःपुंलिङ्गः सखिशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	सखा	सखायौ	सखायः
द्वि०	सखायम्	,,	सखीन्
तृ०	सख्या	सखिभ्याम्	सखिभिः
च०	सख्ये		सखिभ्यः—

पं०	सख्युः	"	"
ष०	"	सख्योः	सखीनाम्
स०	सख्यौ	"	सखिषु
संबो०	हे सखे	हे सखायौ	हे सखायः

इकारान्तः पुंलिङ्गः पतिशब्दः।

	एकव०	द्वि०	बहु०
प्र०	पतिः	पती	पतयः
द्वि०	पतिम्	"	पतीन्
तृ०	पत्या	पतिभ्याम्	पतिभिः
च०	पत्ये	"	पतिभ्यः
पं०	पत्युः	"	"
ष०	"	पत्योः	पतीनाम्
स०	पत्यौ	"	पतिषु
सं०	हे पते	हे पती	हे पतयः

इकारान्तस्त्रिलिङ्गयां कतिशब्दः।

	बहुवचन
प्र०	कति
द्वि०	"
	कतिभिः
	कतिभ्यः
	"
	कतीनाम्
	कतिषु
सं०	हे कति

इकारान्तः पुंलिङ्गः त्रिशब्दो बहुवचनान्तः । इकारान्तो द्विशब्दो द्विवचनान्तः ।

	बहुवचन	द्विवचन
प्र०	त्रयः	द्वौ
द्वि०	त्रीन्	,,
तृ०	त्रिभिः	द्वाभ्याम्
च०	त्रिभ्यः	,,
पं०	,,	,,
ष०	त्रयाणाम्	द्वयोः
स०	त्रिषु	,,
सं०	हे त्रयः	हे द्वौ

इकारान्तः पुंलिङ्गः प्रियत्रिशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	प्रियत्रिः	प्रियत्री	प्रियत्रयः
द्वि०	प्रियत्रिम्	,,	प्रियत्रीन्
तृ०	प्रियत्रिणा	प्रियत्रिभ्याम्	प्रियत्रिभिः
च०	प्रियत्रये	,,	प्रियत्रिभ्यः
पं०	प्रियत्रेः	,,	,,
ष०	प्रियत्रेः	प्रियत्र्योः	प्रियत्रयाणाम्
स०	प्रियत्रौ	,,	प्रियत्रिषु
सं०	हे प्रियत्रे	हे प्रियत्री	हे प्रियत्रयः

इति इकारान्ताः ॥

ईकारान्तः पुंलिङ्गो वातप्रमीशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	वातप्रमीः	वातप्रम्यौ	वातप्रम्यः

द्वि०	वातप्रमीम्	,,	वातप्रमीन्
तृ०	वातप्रम्या	वातप्रमीभ्याम्	वातप्रमीभिः
च०	वातप्रम्ये	,,	वातप्रमीभ्यः
पं०	वातप्रम्यः	वातप्रमीभ्याम्	वातप्रमीभ्यः
ष०	,,	वातप्रम्योः	वातप्रम्याम्
स०	वातप्रमी	,,	वातप्रमीषु
सं०	हे वातप्रमीः	हे वातप्रम्यौ	हे वातप्रम्यः

क्विबन्तस्य तु

आमि वातप्रम्याम् शसि वातप्रम्यः ङौ वातप्रम्यि ॥

ईकारान्तः पुंलिङ्गो बहुश्रेयसीशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	बहुश्रेयसी	बहुश्रेयस्यौ	बहुश्रेयस्यः
द्वि०	बहुश्रेयसीम्	,,	बहुश्रेयसीन्
तृ०	बहुश्रेयस्या	बहुश्रेयसीभ्याम्	बहुश्रेयसीभिः
च०	बहुश्रेयस्यै	,,	बहुश्रेयसीभ्यः
पं०	बहुश्रेयस्याः	,,	,,
ष०	,,	बहुश्रेयस्योः	बहुश्रेयसीनाम्
स०	बहुश्रेयस्याम्	,,	बहुश्रेयसीषु
संबो०	हे बहुश्रेयसि	हे बहुश्रेयस्यौ	हे बहुश्रेयस्यः

एवमतिलक्ष्मीशब्दः सौ तु अतिलक्ष्मीः ॥

ईकारान्तः पुंलिङ्गः प्रधीशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	प्रधीः	प्रध्यौ	प्रध्यः
द्वि०	प्रध्यम्	,,	,,
तृ०	प्रध्या	प्रधीभ्याम्	प्रधीभिः

च०	प्रध्ये	,,	प्रधीभ्यः
पं०	प्रध्यः	,,	प्रधीभ्यः
ष०	,,	प्रध्योः	प्रध्याम्
स०	प्राध्यि	,,	प्रधीषु
संबो०	हे प्रधीः	हे प्रध्यौ	हे प्रध्यः

ईकारान्तः पुलिङ्गः सुधीशब्दः।

	एकव०	द्वि०	बहु०
प्र०	सुधीः	सुधियौ	सुधियः
द्वि०	सुधियम्	,,	,,
तृ०	सुधिया	सुधीभ्याम्	सुधीभिः
च०	सुधिये	,,	सुधीभ्यः
पं०	सुधियः	,,	,,
ष०	,,	सुधियोः	सुधियाम्
स०	सुधियि	,,	सुधीषु
सं०	हे सुधीः	हे सुधियौ	हे सुधियः

एवमेव धात्ववयवसंयोगपूर्वेकारान्ताः 'सुश्री-यवक्री' प्रभृतयः, गति-
रकेतरपूर्वपदकाः शुद्धधीप्रभृतयः॥

ईकारान्तः पुंलिङ्गो ग्रामणीशब्दः।

	एकव०	द्वि०	बहुव०
प्र०	ग्रामणीः	ग्रामण्यौ	ग्रामण्यः
द्वि०	ग्रामण्यम्	ग्रामण्यौ	,,
तृ०	ग्रामण्या	ग्रामणीभ्याम्	ग्रामणीभिः
च०	ग्रामण्ये	ग्रामणीभ्याम्	ग्रामणीभ्यः
पं०	ग्रामण्यः	,,	,,
ष०	,,	ग्रामण्योः	ग्रामणीनाम्

स०	ग्रामण्याम्	,,	ग्रामणीषु
सं०	हे ग्रामणीः	हे ग्रामण्यौ	हे ग्रामण्यः

एवमेव सेनानी-उन्नी-अग्रण्यः ॥

सुष्ठु धीः यस्य सुधीः । ईकारान्तः पुंलिङ्गः सुधीशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	सुधीः	सुध्यौ	सुध्यः
द्वि०	सुध्यम्	,,	,,
तृ०	सुध्या	सुधीभ्याम्	सुधीभिः
च०	सुध्ये	,,	सुधीभ्यः
पं०	सुध्युः	,,	,,
ष०	,,	सुध्योः	सुध्याम्
स०	सुध्यि	,,	सुधीषु
सं०	हे सुधीः	हे सुध्यौ	हे सुध्यः

एवं सुतीशब्दः ॥

इति दीर्घेकारान्ताः ॥

उकारान्तः पुंलिङ्गः शंभुशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	शंभुः	शंभू	शंभवः
द्वि०	शंभुम्	,,	शंभून्
तृ०	शंभुना	शंभुभ्याम्	शंभुभिः
च०	शंभवे	,,	शंभुभ्यः
पं०	शंभोः	,,	,,
ष०	,,	शंभ्वोः	शंभूनाम्
स०	शंभौ	शंभ्वोः	शंभुषु
सं०	हे शंभो	हे शंभू	हे शंभवः

एवं भानु-प्रियधेन्वादयः ॥

उकारान्तः पुंलिङ्गः क्रोष्टुशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	क्रोष्टा	क्रोष्टारौ	क्रोष्टारः
द्वि०	क्रोष्टारम्	"	क्रोष्टून्
तृ०	क्रोष्ट्रा, ष्टुना	क्रोष्टुभ्याम्	क्रोष्टुभिः
च०	क्रोष्ट्रे, ष्टवे	"	क्रोष्टुभ्यः
पं०	क्रोष्टुः, ष्टोः	"	"
ष०	" "	क्रोष्ट्रोः, ष्ट्वोः	क्रोष्टूनाम्
स०	क्रोष्टरि, ष्टौ	" "	क्रोष्टुषु
सं०	हे क्रोष्टो	हे क्रोष्टारौ	हे क्रोष्टारः

इति ह्रस्वोकारान्ताः ॥

ऊकारान्तः पुंलिङ्गो हूहूशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	हूहूः	हूह्वौ	हूह्वः
द्वि०	हूहूम्	"	हूहून्
तृ०	हूह्वा	हूहूभ्याम्	हूहूभिः
च०	हूह्वे	"	हूहूभ्यः
पं०	हूह्वः	"	"
ष०	"	हूह्वोः	हूह्वाम्
स०	हूह्वि	"	हूहूषु
सं०	हे हूहूः	हे हूह्वौ	हे हूह्वः

ऊकारान्तः पुंलिङ्गोऽतिचमूशब्दः ।

	एकव०	द्विव०	बहु०
प्र०	अतिचमूः	अतिचम्वौ	अतिचम्वः

द्वि०	अतिचमुम्	अतिचम्वौ	अतिचमून्
तृ०	अतिचम्वा	अतिचमूभ्याम्	अतिचमूभिः
च०	अतिचम्वै	,,	अतिचमूभ्यः
पं०	अतिचम्वाः	,,	,,
ष०	,,	अतिचम्वोः	अतिचमूनाम्
स०	अतिचम्वाम्	,,	अतिचमूषु
सं०	हे अतिचमु	हे अतिचम्वौ	हे अतिचम्वः

ऊकारान्तः पुंलिङ्गः खलपूशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	खलपूः	खल्वौ	खल्वः
द्वि०	खल्वम्	,,	,,
तृ०	खल्वा	खलपूभ्याम्	खलपूभिः
च०	खल्वे	,,	खलपूभ्यः
पं०	खल्वः	,,	,,
ष०	,,	खल्वोः	खल्वाम्
स०	खल्वि	,,	खलपूषु
सं०	हे खलपूः	हे खल्वौ	हे खल्वः

एवमेव ' वर्षाभू-दृन्भू-करभू-कारभू ' शब्दाः, ' सुद्धू-उत्लू '-प्रभृतयो भूधातुभिन्नदीर्घोकारान्तधात्वन्ताश्च ।

ऊकारान्तः पुंलिङ्गः स्वभूशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	स्वभूः	स्वभुवौ	स्वभुवः
द्वि०	स्वभुवम्	,,	,,
तृ०	स्वभुवा	स्वभूभ्याम्	स्वभूभिः

च०	स्वभुवे	,,	स्वभूभ्यः
पं०	स्वभुवः	,,	,,
ष०	स्वभुवः	स्वभुवोः	स्वभुवाम्
स०	स्वभुवि	,,	स्वभूषु
सं०	हे स्वभूः	हे स्वभुवौ	हे स्वभुवः

एवमेव धात्ववयवसंयोगपूर्वोकारान्ताः 'कटप्रू–आयतस्तू'–प्रभृतयः।

इति दीर्घोकारान्ताः॥

ऋकारान्तः पुंलिङ्गो धातृशब्दः।

	एकव०	द्विव०	बहुव०
प्र०	धाता	धातारौ	धातारः
द्वि०	धातारम्	,,	धातॄन्
तृ०	धात्रा	धातृभ्याम्	धातृभिः
च०	धात्रे	,,	धातृभ्यः
पं०	धातुः	,,	,,
ष०	,,	धात्रोः	धातॄणाम्
स०	धातरि	,,	धातृषु
सं०	हे धातः	हे धातारौ	हे धातारः

एवं 'कर्तृ–वक्तृ–होतृ–पोतृ–नप्तृ–नेष्टृ–त्वष्टृ–क्षत्तृ–प्रशास्तृ–उद्गातृ' शब्दा ...याः॥

ऋकारान्तः पुंलिङ्गः पितृशब्दः।

	एकव०	द्विव०	बहुव०
प्र०	पिता	पितरौ	पितरः
द्वि०	पितरम्	,,	पितॄन्
तृ०	पित्रा	पितृभ्याम्	पितृभिः
च०	पित्रे	,,	पितृभ्यः

पं०	पितुः	,,	,,
ष०	,,	पित्रोः	पितृणाम्
स०	पितरि	,,	पितृषु
सं०	हे पितः	हे पितरौ	हे पितरः

एवं 'जामातृ–भ्रातृ–देवृ–' प्रभृतयः

ऋकारान्तः पुंलिङ्गो नृशब्दः

	एकव०	द्विव०	बहु०
प्र०	ना	नरौ	नरः
द्वि०	नरम्	,,	नॄन्
तृ०	त्रा	नृभ्याम्	नृभिः
च०	त्रे	,,	नृभ्यः
पं०	नुः	,,	,,
ष०	,,	त्रोः	नृणाम् नॄ
स०	नरि	,,	नृषु
सं०	हे नः	हे नरौ	हे नरः

इति ह्रस्वऋकारान्ताः॥

ॠकारान्तः पुंलिङ्गः कॄशब्दः।

	एकव०	द्वि०	बहु०
प्र०	कः	कौ	कः
द्वि०	कम्	,,	कॄन्
तृ०	त्रा	कॄभ्याम्	कॄभिः
च०	क्रे	,,	कॄभ्यः
पं०	कः	,,	,,
ष०	,,	क्रोः	क्राम्

-स०	क्रि	क्रोः	क्रुषु
सं०	हे क्रुः	हे क्रौ	हे क्रः

इति दीर्घकारान्ताः ॥

लकारान्तः पुंलिङ्गो गम्लृशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	गमा	गमलौ	गमलः
द्वि०	गमलम्	गमलौ	गमॄन्
तृ०	गम्ला	गम्लृभ्याम्	गम्लृभिः
च०	गम्ले	,,	गम्लृभ्यः
पं०	गमुल	,,	,,
ष०	,,	गम्लोः	गमॄणाम्
स०	गमलि	,,	गम्लृषु
सं०	हे गमल्	हे गमलौ	हे गमलः

एवं शका ॥

इति लकारान्ताः ॥

एकारान्तः पुंलिङ्गः सेशब्दः ।

	एकव०	द्विव०	बहुव०
[illegible]	सेः	सयौ	सयः
[illegible]	सयम्	सयौ	सयः
[illegible]	सया	सेभ्याम्	सेभिः
[illegible]	सये	,,	सेभ्यः
[illegible]	सेः	,,	,,
[illegible]	,,	सयोः	सयाम्

स०	सयि	सयोः	सेषु
संबो०	हे से	हे सयौ	हे सयः

इत्येकारान्ताः ॥

ऐकारान्तः पुंलिङ्गो रैशब्दः ।

	एकव०	द्विव०	बहुव
प्र०	राः	रायौ	राय
द्वि०	रायम्	,,	,,
तृ०	राया	राभ्याम्	रा
च०	राये	,,	रा
पं०	रायः	,,	,,
ष०	रायः	रायोः	राया
स०	रायि	,,	रायु
संबो०	हे राः	हे रायौ	हे रा

ऐकारान्तः पुंलिङ्गः कैशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	कैः	कायौ	कायः
द्वि०	कायम्	कायौ	कायः
तृ०	काया	कैभ्याम्	कैभिः
च०	काये	,,	कैभ्यः
पं०	कायः	,,	,,
ष०	,,	कायोः	कायाम्
स०	कायि	,,	कैषु
	हे कैः	हे कायौ	हे काय

इत्यैकारान्ताः ॥

एकव०	द्विव०	बहुव०
गौः	गावौ	गावः
गाम्	,,	गाः
गवा	गोभ्याम्	गोभिः
गवे	,,	गोभ्यः
गोः	,,	गोभ्यः
,,	गवोः	,,
गवि	,,	गवाम्
हे गौः	हे गावौ	गोषु
		हे गावः

इत्योकारान्ताः ॥

औकारान्तः पुंलिङ्गो ग्लौशब्दः ।

एकव०	द्विव०	बहुव०
ग्लौः	ग्लावौ	ग्लावः
ग्लावम्	ग्लावौ	ग्लावः
ग्लावा	ग्लौभ्याम्	ग्लौभिः
ग्लावे	,,	ग्लौभ्यः
ग्लावः	,,	ग्लौभ्यः
,,	ग्लावोः	,,
ग्लावि	,,	ग्लावाम्
हे ग्लौः	हे ग्लावौ	ग्लौषु
		हे ग्लावः

इत्यजन्ताः पुंलिङ्गाः ॥

आबन्तः स्त्रीलिङ्गो रमाशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	रमा	रमे	रमाः
द्वि०	रमाम्	,,	,,
तृ०	रमया	रमाभ्याम्	रमाभिः
च०	रमायै	,,	रमाभ्यः
पं०	रमायाः	,,	,,
ष०	,,	रमयोः	रमाणाम्
स०	रमायाम्	,,	रमासु
संबो०	हे रमे	हे रमे	हे रमाः

एवं दुर्गा-गङ्गादयः ॥

आबन्तः स्त्रीलिङ्गः सर्वाशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	सर्वा	सर्वे	सर्वाः
द्वि०	सर्वाम्	सर्वे	सर्वाः
तृ०	सर्वया	सर्वाभ्याम्	सर्वाभिः
च०	सर्वस्यै	,,	सर्वाभ्यः
पं०	सर्वस्याः	,,	,,
ष०	सर्वस्याः	सर्वयोः	सर्वासाम्
स०	सर्वस्याम्	,,	सर्वासु
	हे सर्वे	हे सर्वे	हे सर्वाः

एवं विश्वादय आबन्ताः ॥

आबन्तः स्त्रीलिङ्ग उत्तरपूर्वाशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	उत्तरपूर्वा	उत्तरपूर्वे	उत्तरपूर्वाः
द्वि०	उत्तरपूर्वाम्	,,	उत्तरपूर्वाः
तृ०	उत्तरपूर्वया	उत्तरपूर्वाभ्याम्	उत्तरपूर्वाभिः
च०	उत्तरपूर्वस्यै, र्वायै	,,	उत्तरपूर्वाभ्यः
पं०	उत्तरपूर्वस्याः, र्वायाः	,,	,,
ष०	,, ,,	उत्तरपूर्वयोः	उत्तरपूर्वासाम्, णाम्
स०	उत्तरपूर्वस्याम्, र्वायाम्	,,	उत्तरपूर्वासु
सं०	हे उत्तरपूर्वे	हे उत्तरपूर्वे	हे उत्तरपूर्वाः

आबन्तः स्त्रीलिङ्गो द्वितीयाशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	द्वितीया	द्वितीये	द्वितीयाः
द्वि०	द्वितीयाम्	,,	,,
तृ०	द्वितीयया	द्वितीयाभ्याम्	द्वितीयाभिः
च०	द्वितीयस्यै, यायै	,,	द्वितीयाभ्यः
पं०	द्वितीयस्याः, यायाः	,,	,,
ष०	,, ,,	द्वितीययोः	द्वितीयानाम्
स०	द्वितीयस्याम्, यायाम्	,,	द्वितीयासु
सं०	हे द्वितीये	हे द्वितीये	हे द्वितीयाः

एवं तृतीयाशब्दः ॥

म्बा-अक्का-अल्लाशब्दानां संबोधनैकवचने 'हे अम्ब, हे अक्क, हे अल्ल'
शेषः । शेषं रमावत् ॥

आवन्तः स्त्रीलिङ्गो जराशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	जरा	जरसौ, जरे	जरसः, जराः
द्वि०	जरसम्, जराम्	,, ,,	,, ,,
तृ०	जरसा, जरया	जराभ्याम्	जराभिः
च०	जरसे, जरायै	,,	जराभ्यः
पं०	जरसः, जरायाः	,,	,,
ष०	,, ,,	जरसोः, जरयोः	जरसाम्,
स०	जरसि, जरायाम्	,, ,,	जरासु
सं०	हे जरे	हे जरसौ, हे जरे	हे जरसः,

आवन्तः स्त्रीलिंगो नासिकाशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	नासिका	नासिके	नासिकाः
द्वि०	नासिकाम्	,,	नसः, ना
तृ०	नसा, नासिकया	नोभ्याम्, नासिकाभ्यां	नोभिः,
च०	नसे, नासिकायै	,, ,,	नोभ्यः,
पं०	नसः, नासिकायाः	,, ,,	,,
ष०	,, ,,	नसोः, नासिकयोः	नसाम्,
स०	नसि, नासिकायाम्	,, ,,	नस्सु,
सं०	हे नासिके	हे नासिके	हे

आवन्तः स्त्रीलिङ्गो निशाशब्दः ।

	एकव०	द्वि०	बहुव०
	निशा	निशे	निशाः
	निशाम्	,,	निशः, नि

निशा, निशाया	निड्भ्याम्, निशाभ्याम्	निड्भिः, निशाभि
निशे, निशायै	,, ,,	
निशः, निशायाः	,, ,,	निड्भ्यः, निशाभ्य
निशः, निशायाः	निशोः, निशयोः	,, ,,
निशि, निशायाम्	,, ,,	निशाम्, निशानाम्
हे निशे	हे निशे	निट्सु, ट्त्सु, निशासु
		हे निशाः

आबन्तः स्त्रीलिङ्गः पृतनाशब्दः।

एकव०	द्वि०	बहु०
पृतना	पृतने	पृतनाः
पृतनाम्	पृतने	पृतः, पृतनाः
पृता, पृतनया	पृद्भ्याम्, पृतनाभ्याम्	पृद्भिः, पृतनाभिः
पृते, पृतनायै	,, ,,	,, ,,
पृतः, पृतनायाः	,, ,,	पृद्भ्यः, पृतनाभ्यः
,, ,,	पृतोः, पृतनयोः	,, ,,
पृति, पृतनायाम्	,, ,,	पृताम्, पृतनानाम्
हे पृतने	हे पृतने	पृत्सु, पृतनासु
		हे पृतनाः

इत्याबन्ताः॥

आकारान्तः स्त्रीलिङ्गो गोपाशब्दः।

एकव०	द्वि०	बहुव०
गोपाः	गोपौ	गोपाः
गोपाम्	,,	गोपः
गोपा	गोपाभ्याम्	गोपाभिः
गोपे	,,	गोपाभ्यः
गोपः	,,	,,
,,	गोपोः	गोपाम्

स०	गोपि	गोपोः	गोपासु
सं०	हे गोपाः	हे गोपौ	हे गोपाः

इत्याकारान्ताः ॥

इकारान्तः स्त्रीलिङ्गो मतिशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	मतिः	मती	मतयः
द्वि०	मतिम्	,,	मतीः
तृ०	मत्या	मतिभ्याम्	मतिभिः
च०	मत्यै, मतये	,,	मतिभ्यः
पं०	मत्याः, मतेः	,,	,,
ष०	,, ,,	मत्योः	मतीनाम्
स०	मत्याम्, मतौ	,,	मतिषु
सं०	हे मते	हे मती	हे मतयः

इकारान्तः स्त्रीलिङ्गो द्विशब्दः । इकारान्तः स्त्रीलिङ्गस्त्रि

	द्विव०	बहुव०
प्र०	द्वे	तिस्रः
द्वि०	द्वे	तिस्रः
तृ०	द्वाभ्याम्	तिसृभिः
च०	,,	तिसृभ्यः
पं०	,,	,,
ष०	द्वयोः	तिसृणाम्
	,,	तिसृषु
	हे द्वे	हे तिस्रः

इकारान्ताः ॥

ईकारान्तः स्त्रीलिङ्गो गौरीशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	गौरी	गौर्यौ	गौर्यः
द्वि०	गौरीम्	,,	गौरीः
तृ०	गौर्या	गौरीभ्याम्	गौरीभिः
च०	गौर्यै	,,	गौरीभ्यः
पं०	गौर्याः	गौरीभ्याम्	गौरीभ्यः
ष०	गौर्याः	गौर्योः	गौरीणाम्
स०	गौर्याम्	,,	गौरीषु
सं०	हे गौरि	हे गौर्यौ	हे गौर्यः

एवं क्रोडी-वाणी-नद्यादयः ॥

एवं लक्ष्मी–तरी–तन्त्री–प्रभृतयः ॥ तत्र प्रथमैकवचने 'लक्ष्मीः, तरीः, तन्त्रीः ' इति विशेषः ॥

ईकारान्तः स्त्रीलिङ्गः स्त्रीशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	स्त्री	स्त्रियौ	स्त्रियः
द्वि०	स्त्रियम्, स्त्रीम्	,,	स्त्रियः, स्त्रीः
तृ०	स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः
च०	स्त्रियै	,,	स्त्रीभ्यः
पं०	स्त्रियाः	,,	,,
ष०	,,	स्त्रियोः	स्त्रीणाम्
स०	स्त्रियाम्	,,	स्त्रीषु
सं०	हे स्त्रि	हे स्त्रियौ	हे स्त्रियः

ईकारान्तः स्त्रीलिङ्गः श्रीशब्दः ।

	एकव०	द्विव०	बहुव
प्र०	श्रीः	श्रियौ	श्रियः
द्वि०	श्रियम्	,,	,,
तृ०	श्रिया	श्रीभ्याम्	श्रीभिः
च०	श्रियै, ये	,,	श्रीभ्यः
पं०	श्रियाः, यः	,,	,,
ष०	,, ,,	श्रियोः	श्रीणाम्,
स०	श्रियि, याम्	,,	श्रीषु
सं०	हे श्रीः	हे श्रियौ	हे श्रिय

इतीकारान्ताः ॥

उकारान्तः स्त्रीलिङ्गो धेनुशब्दः ।

	एकव०	द्विव०	बहु
प्र०	धेनुः	धेनू	धेन
द्वि०	धेनुम्	,,	धेनूः
तृ०	धेन्वा	धेनुभ्याम्	धेनु
च०	धेन्वै, धेनवे	,,	धेनु
पं०	धेन्वाः, धेनोः	,,	,,
ष०	,, ,,	धेन्वोः	धेनून
स०	धेन्वाम्, धेनौ	,,	धेनुषु
सं०	हे धेनो	हे धेनू	हे धे

इत्युकारान्ताः ॥

ऊकारान्तः स्त्रीलिङ्गो वधूशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	वधूः	वध्वौ	वध्वः
द्वि०	वधूम्	,,	वधूः
तृ०	वध्वा	वधूभ्याम्	वधूभिः
च०	वध्वै	,,	वधूभ्यः
पं०	वध्वाः	,,	,,
ष०	,,	वध्वोः	वधूनाम्
स०	वध्वाम्	,,	वधूषु
सं०	हे वधु	हे वध्वौ	हे वध्वः

एवं चमूश्वश्र्वादयः ॥

ऊकारान्तः स्त्रीलिङ्गो भूशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	भूः	भुवौ	भुवः
द्वि०	भुवम्	,,	,,
तृ०	भुवा	भूभ्याम्	भूभिः
च०	भुवै, वे	,,	भूभ्यः
पं०	भुवाः, वः	,,	,,
ष०	,, ,,	भुवोः	भूणाम्,भुवाम्
स०	भुवि, वाम्	,,	भूषु
सं०	हे भूः	हे भुवौ	हे भुवः

ऊकारान्तः स्त्रीलिङ्गः पुनर्भूशब्दः ।

प्र०	पुनर्भूः	पुनर्भ्वौ	पुनर्भ्वः
द्वि०	पुनर्भ्वम्	,,	,,

तृ०	पुनर्भ्वा	पुनर्भूभ्याम्	पुनर्भू
च०	पुनर्भ्वे	,,	पुनर्भू
पं०	पुनर्भ्वाः	,,	,,
ष०	,,	पुनर्भ्वोः	पुनर्भू
स०	पुनर्भ्वाम्	,,	पुनर्भू
सं०	हे पुनर्भु	हे पुनर्भ्वौ	हे पुन

ऊकारान्तः स्त्रीलिङ्गो वर्षाभूशब्दः ।

प्र०	वर्षाभूः	वर्षाभ्वौ	वर्षाभ्व
द्वि०	वर्षाभ्वम्	,,	,,
तृ०	वर्षाभ्वा	वर्षाभूभ्याम्	वर्षाभू
च०	वर्षाभ्वे	,,	वर्षाभू
पं०	वर्षाभ्वाः	,,	,,
ष०	,,	वर्षाभ्वोः	वर्षाभूणा
स०	वर्षाभ्वाम्	,,	वर्षाभू
संबो०	हे वर्षाभु	हे वर्षाभ्वौ	हे वर्षा

भेक्यां तु मतान्तरेणेदृशानि रूपाणि ।

इत्युकारान्ताः ॥

ऋकारान्तः स्त्रीलिङ्गः स्वसृशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	स्वसा	स्वसारौ	स्वसारः
	स्वसारम्	,,	स्वसॄः
	स्वस्रा	स्वसृभ्याम्	स्वसृभिः
	स्वस्रे	,,	स्वसृभ्यः
	स्वसुः	स्वसृभ्याम्	स्वसृभ्यः

ष०	स्वसुः	स्वस्रोः	स्वसॄणाम्
स०	स्वसरि	,,	स्वसृषु
सं०	हे स्वसः	हे स्वसारौ	हे स्वसारः

दुहितृ-ननान्दृ-यातृ-मातृ-शब्दाः पितृशब्दवत्।
शास तु-दुहितॄः, ननान्दॄः, यातॄः, मातॄः॥

ओकारान्तः स्त्रीलिङ्गो द्योशब्दः।

	एकव०	द्वि०	बहुव०
प्र०	द्यौः	द्यावौ	द्यावः
द्वि०	द्याम्	,,	द्यावः
तृ०	द्यवा	द्योभ्याम्	द्याः
च०	द्यवे	,,	द्योभिः
पं०	द्योः	,,	द्योभ्यः
ष०	,,	द्यवोः	,,
स०	द्यवि	,,	द्यवाम्
सं०	हे द्यौः	हे द्यावौ	द्योषु हे द्यावः

ऐकारान्तः स्त्रीलिङ्गो रैशब्दः पुंवत्॥

औकारान्तः स्त्रीलिङ्गो नौशब्दः।

	एकव०	द्वि०	बहु०
प्र०	नौः	नावौ	नावः
द्वि०	नावम्	,,	नावः
तृ०	नावा	नौभ्याम्	,,
च०	नावे	,,	नौभिः
पं०	नावः	,,	नौभ्यः
ष०	नावः	नावोः	,,
			नावाम्

स०	नावि	नावोः	नौषु
सं०	हे नौः	हे नावौ	हे नावः

॥ इत्यौदन्ताः स्त्रीलिङ्गाः ॥

अकारान्तो नपुंसकलिङ्गो ज्ञानशब्दः ।

	एक०	द्वि०	बहु०
प्र०	ज्ञानम्	ज्ञाने	ज्ञानानि
द्वि०	,,	,,	,,
तृ०	ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः
च०	ज्ञानाय	,,	ज्ञानेभ्यः
पं०	ज्ञानात्-द्	,,	,,
ष०	ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
स०	ज्ञाने	,,	ज्ञानेषु
सं०	हे ज्ञान	हे ज्ञाने	हे ज्ञानानि

एवं-धन-वन-फलादयः ॥

अकारान्तो नपुंसकलिङ्गः कतरशब्दः ।

	एक०	द्वि०	बहु०
प्र०	कतरत्-द्	कतरे	कतराणि
द्वि०	,,	,,	,,
तृ०	कतरेण	कतराभ्याम्	कतरैः
च०	कतरस्मै	,,	कतरेभ्यः
पं०	कतरस्मात्-द्	,,	,,
ष०	कतरस्य	कतरयोः	कतरेषाम्
	कतरस्मिन्	कतरयोः	कतरेषु
	हे कतरत्-द्	हे कतरे	हे कतराणि

एवं यतरप्रभृतय इतरान्ता विश्वादिषु दर्शिताः ॥

अकारान्तो नपुंसकलिङ्गोऽजरशब्दः ।

	एक०	द्वि०	बहु०
प्र०	अजरम्	अजरसी, रे	अजरांसि, राणि
द्वि०	,, रसम्	,, ,,	,, ,,
तृ०	अजरसा, रेण	अजराभ्याम्	अजरैः
च०	अजरसे, राय	,,	अजरेभ्यः
पं०	अजरसः, रात्-द्	अजराभ्याम्	अजरेभ्यः
ष०	,, रस्य	अजरसोः, रयोः	अजरसाम्, राणाम्
स०	अजरसि, रे	,, ,,	अजरेषु
सं०	हे अजर	हे अजरसी, रे	हे अजरांसि, राणि

अकारान्तो नपुंसकलिङ्गो हृदयशब्दः ।

	एकव०	द्विव०	बहुव०
	हृत्-द्, हृदयम्	हृदये, दी	हृदयानि, हृन्दि
	,, ,,	,, ,,	,, ,,
	हृदा, हृदयेन	हृद्भ्यां, हृदयाभ्याम्	हृद्भिः, हृदयैः
	हृदे, हृदयाय	,, ,,	हृद्भ्यः, हृदयेभ्यः
	हृदः, हृदयात्-द्	,, ,,	,, ,,
	,, हृदयस्य	हृदोः, हृदययोः	हृदाम्, हृदयानाम्
	हृदि, हृदये	,, ,,	हृत्सु, हृदयेषु
	हे हृदय	हे हृदये	हे हृदयानि

अकारान्तो नपुंसकलिङ्ग उदकशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	उदकम्	उदके	उदकानि
द्वि०	,,	,,	,, उदानि

तृ०	उद्ना, उदकेन	उदभ्याम्, उदकाभ्याम्	उदभिः, उदकै
च०	उद्ने, उदकाय	" "	उदभ्यः, उदके
पं०	उद्नः, उदकात्-द्	" "	" "
ष०	" उदकस्य	उद्नोः, उदकयोः	उद्नाम्, उदका
स०	उद्नि, उदनि, उदके	" "	उदसु, उदके
सं०	हे उदक	हे उदके	हे उदकानि

अकारान्तो नपुंसकलिङ्ग आस्यशब्दः ।

	एक०	द्वि०	बहु०
प्र०	आस्यम्	आस्ये	आस्यानि
द्वि०	"		" आसानि
तृ०	आस्ना, स्येन	आसभ्याम्, स्याभ्याम्	आसभिः, स्यैः
च०	आस्ने, स्याय	"	आसभ्यः, स्येभ्यः
पं०	आस्नः, स्यात्, द्		" "
ष०	" स्यस्य	आस्नोः स्ययोः	आस्नाम्, स्याना
स०	आस्नि, आसनि, स्ये	आस्नोः, स्ययोः	आसु, स्येषु
सं०	हे आस्य	हे आस्ये	हे आस्यानि

[illegible]

	एक०	द्वि०	बहु०
प्र०	[illegible]	[illegible]	[illegible]
द्वि०	" "	" "	" "
तृ०	[illegible]	[illegible]	[illegible]
च०	[illegible]	"	[illegible]
पं०	[illegible]	" "	"
ष०	[illegible]	[illegible]	[illegible]

स०	मांसि, मांसे	मांसोः, मांसयोः	मान्सु, मांसेषु
सं०	हे मान, मांस	हे मांसी, मांसे	हे मांसि, मांसानि

इत्यकारान्ताः ॥

आकारान्तो नपुंसकलिङ्गः श्रीपाशब्दो ज्ञानशब्दवत् ॥

इकारान्तो नपुंसकलिङ्गो वारिशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	वारि	वारिणी	वारीणि
द्वि०	,,	,,	,,
तृ०	वारिणा	वारिभ्याम्	वारिभिः
च०	वारिणे	,,	वारिभ्यः
पं०	वारिणः	,,	,,
ष०	,,	वारिणोः	वारीणाम्
स०	वारिणि	,,	वारिषु
सं०	हे वारे, वारि	हे वारिणी	हे वारीणि

इकारान्तो नपुंसकलिङ्गोऽनादिशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	अनादि	अनादिनी	अनादीनि
द्वि०	,,	,,	,,
तृ०	अनादिना	अनादिभ्याम्	अनादिभिः
च०	अनादिने, द्ये	,,	अनादिभ्यः
पं०	अनादिनः, देः	,,	,,
ष०	,, ,,	अनादिनोः, द्योः	अनादीनाम्
स०	अनादिनि, दौ	अनादिनोः, द्योः	अनादिषु
सं०	हे अनादे, दि	हे अनादिनी	हे अनादीनि

१

इकारान्तो नपुंसकलिङ्गोऽस्थिशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	अस्थि	अस्थिनी	अस्थीनि
द्वि०	,,	,,	,,
तृ०	अस्थ्ना	अस्थिभ्याम्	अस्थिभिः
च०	अस्थ्ने	,,	अस्थिभ्यः
पं०	अस्थ्नः	अस्थिभ्याम्	अस्थिभ्यः
ष०	,,	अस्थ्नोः	अस्थ्नाम्
स०	अस्थ्नि, अस्थनि	,,	अस्थिषु
सं०	हे अस्थे, हेअस्थि	हे अस्थिनी	हे अस्थीनि

इकारान्तो नपुंसकलिङ्गो दधिशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	दधि	दधिनी	दधीनि
द्वि०	,,	,,	,,
तृ०	दध्ना	दधिभ्याम्	दधिभिः
च०	दध्ने	,,	दधिभ्यः
पं०	दध्नः	,,	,,
ष०	,,	दध्नोः	दध्नाम्
स०	दध्नि, दधनि	,,	दधिषु
सं०	हे दधे, दधि	हे दधिनी	हे दधीनि

एवं सक्थ-अक्षि-शब्दावपि ॥

ईकारान्तो नपुंसकलिङ्गः सुधीशब्दः ।

	एकव०	द्विव०	बहुव०
	सुधि	सुधिनी	सुधीनि
	,,	,,	,,

तृ०	सुधिया, धिना	सुधिभ्याम्	सुधिभिः
च०	सुधिये, ने	,,	सुधिभ्यः
पं०	सुधियः, नः	,,	सुधिभ्यः
ष०	,, ,,	सुधियोः, नोः	सुधीनाम्
स०	सुधियि, नि	,, ,,	सुधिषु
सं०	सुधे, हे सुधि हे सुधिनी		हे सुधीनि

इतीकारान्ताः ॥

उकारान्तो नपुंसकलिङ्गो मधुशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	मधु	मधुनी	मधूनि
द्वि०	,,	,,	,,
तृ०	मधुना	मधुभ्याम्	मधुभिः
च०	मधुने	,,	मधुभ्यः
पं०	मधुनः	,,	मधुभ्यः
ष०	,,	मधुनोः	,,
स०	मधुनि		मधूनाम्
			मधुषु
सं०	हे मधो, हे मधु	हे मधुनी	हे मधूनि

उकारान्तो नपुंसकलिङ्गः सानुशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	सानु, स्नु	सानुनी, स्नुनी	सानूनि, स्नूनि
द्वि०	,, ,,	,, ,,	,, ,,
तृ०	सानुना, स्नुना	सानुभ्याम्, स्नुभ्याम्	सानुभिः, स्नुभिः
च०	सानुने, स्नुने	,, ,,	सानुभ्यः स्नुभ्यः
पं०	सानुनः, स्नुनः	,, ,,	,, ,,
ष०	,, ,,	सानुनोः, स्नुनोः	सानूनाम्, स्नूनाम्

स०	सानुनि, स्नुनि	सानुनोः, स्नुनोः	सानुषु, स्नु
सं०	हे सानो, स्नो, सानु, स्नु	हे सानुनी, स्नुनी	हे सानूनि

उकारान्तो नपुंसकलिङ्गः प्रियक्रोष्टुशब्दः।

	एक०	द्वि०	बहु०
प्र०	प्रियक्रोष्टु	प्रियक्रोष्टुनी	प्रियक्रोष्टूनि
द्वि०	,,	,,	,,
तृ०	प्रियक्रोष्ट्रा, ष्टुना	प्रियक्रोष्टुभ्याम्	प्रियक्रोष्टुभि
च०	प्रियक्रोष्ट्रे, ष्टवे, ष्टुने	,,	प्रियक्रोष्टुभ्य
पं०	प्रियक्रोष्टुः, ष्टोः, ष्टुनः	,,	,,
प०	प्रियक्रोष्टुः, ष्टोः, ष्टुनः	प्रियक्रोष्ट्रोः, ष्टोः	प्रियक्रोष्टून
स०	प्रियक्रोष्टरि, ष्टौ, ष्टुनि	,, ,,	प्रियक्रोष्टुषु
सं०	हे प्रियक्रोष्टो, ष्टु	हे प्रियक्रोष्टुनी	हे प्रियक्रो

ऊकारान्तो नपुंसकलिङ्गः सुलूशब्दः।

	एकव०	द्विव०	बहुव०
प्र०	सुलु	सुलुनी	सुलूनि
द्वि०	,,	,,	,,
तृ०	सुल्वा, सुलुना	सुलुभ्याम्	सुलुभिः
च०	सुल्वे, सुलुने	,,	सुलुभ्यः
पं०	सुल्वः, सुलुनः	,,	,,
प०	,, ,,	सुल्वोः, सुलुनोः	सुलूनाम्
स०	सुल्वि, सुलुनि	,, ,,	सुलुषु
सं०	हे सुलो, सुलु	हे सुलुनी	हे सुलूनि

ऊकारान्तो नपुंसकलिङ्गो जम्बूशब्दः।

	एकव०	द्विव०	बहुव०
प्र०	जम्बु	जम्बुनी	जम्बूनि

द्वि०	जम्बु	जम्बुनी	जम्बूनि
तृ०	जम्बुना	जम्बुभ्याम्	जम्बुभिः
च०	जम्बुने	,,	जम्बुभ्यः
पं०	जम्बुनः	,,	,,
ष०	,,	जम्बुनोः	जम्बूनाम्
स०	जम्बुनि	,,	जम्बुषु
संबो०	हे जम्बो, म्बु	हे जम्बुनी	हे जम्बूनि

इत्युकारान्ताः ॥

ऋकारान्तो नपुंसकलिङ्गो धातृशब्दः ।

	एकव०	द्वि०	बहु०
प्र०	धातृ	धातृणी	धातॄणि
द्वि०	धातृ	धातृणी	धातॄणि
तृ०	धातृणा, धात्रा	धातृभ्याम्	धातृभिः
च०	धातृणे, धात्रे	,,	धातृभ्यः
पं०	धातुः, धातृणः	,,	,,
ष०	,, ,,	धात्रोः, धातृणोः	धातॄणाम्
स०	धातरि, धातृणि	,, ,,	धातृषु
संबो०	हे धातः, तृ	हे धातृणी	हे धातॄणि

एवं ज्ञातृ-कर्त्रादयः ॥

इत्यृकारान्ताः ॥

एकारान्तो नपुंसकलिङ्गः सेशब्दः ।

	एकव०	द्विव०	बहुव०
०	सि	सिनी	सीनि
०	,,	,,	,,
०	सिना	सिभ्याम्	सिभिः

हकारान्तः पुंलिङ्गो दुहशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	धुक्-ग्	दुहौ	दुहः
द्वि०	दुहम्	,,	,,
तृ०	दुहा	धुग्भ्याम्	धुग्भिः
च०	दुहे	,,	धुग्भ्यः
पं०	दुहः	,,	,,
ष०	,,	दुहोः	दुहाम्
स०	दुहि	,,	धुक्षु
सं०	हे धुक्-ग्	हे दुहौ	हे दुहः

हकारान्तः पुंलिङ्गो द्रुहशब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	ध्रुक्-ग्-ट्-ड्	द्रुहौ	द्रुहः
द्वि०	द्रुहम्	द्रुहौ	द्रुहः
तृ०	द्रुहा	ध्रुग्भ्याम्, ध्रुड्भ्याम्	ध्रुग्भिः, ध्रुड्भिः
च०	द्रुहे	,, ,,	ध्रुग्भ्यः ध्रुड्भ्यः
पं०	द्रुहः	,, ,,	,, ,,
ष०	द्रुहः	द्रुहोः	द्रुहाम्
स०	द्रुहि	,,	ध्रुक्षु-ट्सु-ध्रुट्त्सु
सं०	हे ध्रुक्-ग्-ट्-ड्	हे द्रुहौ	हे द्रुहः

एवं मुह-स्नुह-स्निहः ॥

हकारान्तः पुंलिङ्गो विश्ववाहशब्दः ।

	एकव०	द्वि०	बहुव०
प्र०	विश्ववाट्-ड्	विश्ववाहौ	विश्ववाहः
द्वि०	विश्ववाहम्	,,	विश्वौहः

तृ०	विश्वौहा	विश्ववाड्भ्याम्	विश्ववाड्भिः
च०	विश्वौहे	,,	विश्ववाड्भ्यः
पं०	विश्वौहः	,,	,,
ष०	,,	विश्वौहोः	विश्वौहाम्
स०	विश्वौहि	,,	विश्ववाट्सु, ट्त्सु
सं०	हे विश्ववाट्-ड्	हे विश्ववाहौ	हे विश्ववाहः

हकारान्तः पुंलिङ्गोऽनडुह्शब्दः ।

	एकव०	द्वि०	बहु०
प्र०	अनड्वान्	अनड्वाहौ	अनड्वाहः
द्वि०	अनड्वाहम्	,,	अनडुहः
तृ०	अनडुहा	अनडुद्भ्याम्	अनडुद्भिः
च०	अनडुहे	,,	अनडुद्भ्यः
पं०	अनडुहः	,,	,,
ष०	,,	अनडुहोः	अनडुहाम्
स०	अनडुहि	,,	अनडुत्सु
सं०	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः

हकारान्तः पुंलिङ्गस्तुरासाहशब्दः ।

	एकव०	द्विव०	बहुव०
[प्र]०	तुराषाट्-ड्	तुरासाहौ	तुरासाहः
द्वि०	तुरासाहम्	तुरासाहौ	तुरासाहः
[तृ]०	तुरासाहा	तुराषाड्भ्याम्	तुराषाड्भिः
[च]०	तुरासाहे	,,	तुराषाड्भ्यः
[पं]०	तुरासाहः	,,	,,
[ष]०	,,	तुरासाहोः	तुरासाहाम्

स०	सुगणि	सुगणोः	सुगण्सु-ण्ट्सु
सं०	हे सुगण्-ण्	हे सुगणौ	हे सुगणः

वकारान्तः पुंलिङ्गः सुदिव्शब्दः ।

	एकव०	द्विव०	बहु०
प्र०	सुद्यौः	सुदिवौ	सुदिवः
द्वि०	सुदिवम्	,,	,,
तृ०	सुदिवा	सुद्युभ्याम्	सुद्युभिः
च०	सुदिवे	,,	सुद्युभ्यः
पं०	सुदिवः	,,	,,
ष०	,,	सुदिवोः	सुदिवाम्
स०	सुदिवि	,,	सुद्युषु
सं०	हे सुद्यौः	हे सुदिवौ	हे सुदिवः

रेफान्तः पुंलिङ्गश्चतुर्शब्दः ।

	एक०	द्वि०	बहु०
प्र०			चत्वारः
द्वि०			चतुरः
तृ०			चतुर्भिः
च०			चतुर्भ्यः
पं०			,,
ष०			चतुर्णाम्
स०			चतुर्षु
सं०			हे चत्वारः

रेफान्तः पुंलिङ्गः प्रियचतुर्शब्दः ।

	एकव०	द्वि०	बहु०
प्र०	प्रियचत्वाः	प्रियचत्वारौ	प्रियचत्वारः

द्वि०	प्रियचत्वारम्	प्रियचत्वारौ	प्रियचतुरः
तृ०	प्रियचतुरा	प्रियचतुर्भ्याम्	प्रियचतुर्भिः
च०	प्रियचतुरे	,,	प्रियचतुर्भ्यः
पं०	प्रियचतुरः	प्रियचतुर्भ्याम्	प्रियचतुर्भ्यः
ष०	,,	प्रियचतुरोः	प्रियचतुराम्
स०	प्रियचतुरि	,,	प्रियचतुर्षु
सं०	हे प्रियचत्वः	हे प्रियचत्वारौ	हे प्रियचत्वारः

लकारान्तः पुंलिङ्गः कमल्शब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	कमल्	कमलौ	कमलः
द्वि०	कमलम्	,,	,,
तृ०	कमला	कमल्भ्याम्	कमल्भिः
च०	कमले	,,	कमल्भ्यः
पं०	कमलः	,,	कमल्भ्यः
ष०	,,	कमलोः	कमलाम्
स०	कमलि	,,	कमल्षु
सं०	हे कमल्	हे कमलौ	हे कमलः

मान्तः पुंलिङ्गः प्रशाम्शब्दः ।

	एक०	द्वि०	बहु०
[प्र]०	प्रशान्	प्रशामौ	प्रशामः
द्वि०	प्रशामम्	,,	,,
[तृ]०	प्रशामा	प्रशान्भ्याम्	प्रशान्भिः
[च]०	प्रशामे	,,	प्रशान्भ्यः
[पं]०	प्रशामः	,,	प्रशान्भ्यः
[ष]०	प्रशामः	प्रशामोः	प्रशामाम्

स॰	प्रशामि	प्रशामोः	प्रशान्सु
सं॰	हे प्रशान्	हे प्रशामौ	हे प्रशामः

मान्तः पुंलिङ्गः किम्शब्दः ।

	एकव॰	द्वि॰	बहुव॰
प्र॰	कः	कौ	के
द्वि॰	कम्	,,	कान्
तृ॰	केन	काभ्याम्	कैः
च॰	कस्मै	,,	केभ्यः
पं॰	कस्मात्-द्	,,	,,
ष॰	कस्य	कयोः	केषाम्
स॰	कस्मिन्	कयोः	केषु
सं॰	हे क	हे कौ	हे के

मान्तः पुलिङ्ग इदम्शब्दः ।

	एकव॰	द्वि॰	बहुव॰
प्र॰	अयम्	इमौ	इमे
द्वि॰	इमम्	,,	इमान्
तृ॰	अनेन	आभ्याम्	एभिः
च॰	अस्मै	,,	एभ्यः
पं॰	अस्मात्-द्	,,	,,
ष॰	अस्य	अनयोः	एषाम्
स॰	अस्मिन्	,,	एषु

सं॰ अस्य प्रायः संबोधनं नास्ति त्यदादित्वात् ।

अन्वादेशे तु इदम्शब्दस्य अमि एनम्, औटि एनौ, शसि एनान्, एनेन, ओसि एनयोः, इति विशेषो बोध्यः ॥

अकच्सहितस्य रूपाणि तु–

	एकव०	द्विव०	बहुव०
प्र०	अयकम्	इमकौ	इमके
द्वि०	इमकम्	,,	इमकान्
[illegible]	इमकेन	इमकाभ्याम्	इमकैः
[illegible]	इमकस्मै	,,	इमकेभ्यः
[illegible]	इमकस्मात्	,,	,,
ष०	इमकस्य	इमकयोः	इमकेषाम्
स०	इमकस्मिन्	,,	इमकेषु

णकारान्तः पुंलिङ्गः सुगण्शब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	सुगण्	सुगणौ	सुगणः
द्वि०	सुगणम्	,,	,,
तृ०	सुगणा	सुगण्भ्याम्	सुगण्भिः
च०	सुगणे	,,	सुगण्भ्यः
पं०	सुगणः	,,	,,
ष०	,,	सुगणोः	सुगणाम्
स०	सुगणि	,,	सुगण्सु,णट्सु,ण्ट्सु
सं०	हे सुगण्	हे सुगणौ	हे सुगणः

नान्तः पुंलिङ्गो राजन्शब्दः ।

	एक०	द्वि०	बहु०
[illegible]	राजा	राजानौ	राजानः
[illegible]	राजानम्	,,	राज्ञः
[illegible]	राज्ञा	राजभ्याम्	राजभिः
[illegible]	राज्ञे	,,	राजभ्यः

पं०	राज्ञः	राजभ्याम्	राजभ्यः
ष०	"	राज्ञोः	राज्ञाम्
स०	राज्ञि-जनि	राज्ञोः	राजसु
सं०	हे राजन्	हे राजानौ	हे राजानः

नान्तः पुंलिंगो यज्वन् शब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	यज्वा	यज्वानौ	यज्वानः
द्वि०	यज्वानम्	"	यज्वनः
तृ०	यज्वना	यज्वभ्याम्	यज्वभिः
च०	यज्वने	"	यज्वभ्यः
पं०	यज्वनः	"	"
ष०	"	यज्वनोः	यज्वनाम्
स०	यज्वनि	यज्वनोः	यज्वसु
सं०	हे यज्वन्	हे यज्वानौ	हे यज्वानः

नान्तः पुंलिङ्गो ब्रह्मन् शब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	ब्रह्मा	ब्रह्माणौ	ब्रह्माणः
द्वि०	ब्रह्माणम्	"	ब्रह्मणः
तृ०	ब्रह्मणा	ब्रह्मभ्याम्	ब्रह्मभिः
च०	ब्रह्मणे	"	ब्रह्मभ्यः
पं०	ब्रह्मणः	"	"
ष०	"	ब्रह्मणोः	ब्रह्मणाम्
स०	ब्रह्मणि	"	ब्रह्मसु
सं०	हे ब्रह्मन्	हे ब्रह्माणौ	हे ब्रह्माणः

नकारान्तः पुंलिङ्गो वृत्रहन्शब्दः ।

	एकव०	द्विव०	बहुव०
प्र०	वृत्रहा	वृत्रहणौ	वृत्रहणः
द्वि०	वृत्रहणम्	,,	वृत्रघ्नः
तृ०	वृत्रघ्ना	वृत्रहभ्याम्	वृत्रहभिः
च०	वृत्रघ्ने	वृत्रहभ्याम्	वृत्रहभ्यः
पं०	वृत्रघ्नः	,,	,,
ष०	,,	वृत्रघ्नोः	वृत्रघ्नाम्
स०	वृत्रघ्नि, हणि	,,	वृत्रहसु
सं०	हे वृत्रहन्	हे वृत्रहणौ	हे वृत्रहणः

एवम् अर्यमन्-पूषन्-शब्दौ ॥

नकारान्तः पुंलिङ्गो मघवन्शब्दः ।

	एकव०	द्वि०	बहु०
०	मघवान्	मघवन्तौ	मघवन्तः
०	मघवन्तम्	,,	मघवतः
०	मघवता	मघवद्भ्याम्	मघवद्भिः
०	मघवते	,,	मघवद्भ्यः
पं०	मघवतः	,,	,,
ष०	,,	मघवतोः	मघवताम्
स०	मघवति	,,	मघवत्सु
सं०	हे मघवन्	हे मघवन्तौ	हे मघवन्तः

तृत्वाभावे मघवन्शब्दस्य रूपाणि तु—

	एक०	द्वि०	बहु०
प्र०	मघवा	मघवानौ	मघवानः

द्वि०	मघवानम्	मघवानौ	मघोनः
तृ०	मघोना	मघवभ्याम्	मघवभिः
च०	मघोने	,,	मघवभ्यः
पं०	मघोनः	,,	,,
ष०	,,	मघोनोः	मघोनाम्
स०	मघोनि	,,	मघवसु
सं०	हे मघवन्	हे मघवानौ	हे मघवानः

नान्तः पुंलिङ्गो श्वन्शब्दः ।

	एकव०	द्विव०	बहु०
प्र०	श्वा	श्वानौ	श्वानः
द्वि०	श्वानम्	,,	शुनः
तृ०	शुना	श्वभ्याम्	श्वभिः
च०	शुने	,,	श्वभ्यः
पं०	शुनः	,,	,,
ष०	,,	शुनोः	शुनाम्
स०	शुनि	,,	श्वसु
सं०	हे श्वन्	हे श्वानौ	हे श्वानः

नान्तः पुंलिङ्गो युवन्शब्दः ।

	एकव०	द्विव०	बहु०
प्र०	युवा	युवानौ	युवानः
द्वि०	युवानम्	,,	यूनः
तृ०	यूना	युवभ्याम्	युवभिः

ष०	यूने		
पं०	यूनः	युवभ्याम्	युवभ्यः
ष०	,,	,,	,,
स०	यूनि	यूनोः	यूनाम्
सं०	हे युवन्	,,	युवसु
		हे युवानौ	हे युवानः

नान्तः पुंलिङ्गोऽर्वन्शब्दः।

	एकव०	द्विव०	बहुव०
प्र०	अर्वा	अर्वन्तौ	अर्वन्तः
द्वि०	अर्वन्तम्	,,	अर्वतः
तृ०	अर्वता	अर्वद्भ्याम्	अर्वद्भिः
च०	अर्वते	,,	अर्वद्भ्यः
पं०	अर्वतः	,,	,,
ष०	अर्वतः	अर्वतोः	अर्वताम्
स०	अर्वति	,,	अर्वत्सु
सं०	हे अर्वन्	हे अर्वन्तौ	हे अर्वन्तः

अनर्वा यज्ववत्॥

नकारान्तः पुंलिङ्गः शार्ङ्गिन्शब्दः।

	एक०	द्वि०	बहु०
प्र०	शार्ङ्गी	शार्ङ्गिणौ	शार्ङ्गिणः
द्वि०	शार्ङ्गिणम्	,,	,,
तृ०	शार्ङ्गिणा	शार्ङ्गिभ्याम्	शार्ङ्गिभिः
च०	शार्ङ्गिणे	,,	शार्ङ्गिभ्यः
पं०	शार्ङ्गिणः	,,	,,
ष०	,,	शार्ङ्गिणोः	शार्ङ्गिणाम्

स०	शार्ङ्गिणि	शार्ङ्गिणोः	शार्ङ्गिषु
सं०	हे शार्ङ्गिन्	हे शार्ङ्गिणौ	हे शार्ङ्गिणः

एवं वाग्मिन्–दण्डिन्-प्रभृतयः ।

नान्तः पुंल्लिङ्गः पथिन्शब्दः ।

	एकव०	द्वि०	बहु०
प्र०	पन्थाः	पन्थानौ	पन्थानः
द्वि०	पन्थानम्	”	पथः
तृ०	पथा	पथिभ्याम्	पथिभिः
च०	पथे	”	पथिभ्यः
पं०	पथः	”	”
ष०	”	पथोः	पथाम्
स०	पथि	पथोः	पथिषु
सं०	हे पन्थाः	हे पन्थानौ	हे पन्थानः

एवं मथिन्-ऋभुक्षिन्-शब्दौ ।

त्रिलिंगसमरूपः पञ्चन्शब्दः ।

	बहु०
प्र०	पञ्च
द्वि०	”
तृ०	पञ्चभिः
च०	पञ्चभ्यः
पं०	”
ष०	पञ्चानाम्
स०	पञ्चसु
सं०	हे पञ्च

